# मन्यु सूक्तम्

ऋग्वेद संहिता; मण्डलं 10; सूक्तं 83,84

यस्ते मन्योऽविधद् वज्र सायक सह ओजः पुष्यति विश्वमानुषक् ।
साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥ 1 ॥

मन्युरिन्द्रो मन्युरेवास देवो मन्युर् होता वरुणो जातवेदाः ।
मन्युं विश ईलते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥ 2 ॥

अभीहि मन्यो तवसस्तवीयान् तपसा युजा वि जहि शत्रून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥ 3 ॥

त्वं हि मन्यो अभिभूत्योजाः स्वयम्भूर्भामो अभिमातिषाहः ।
विश्वचर्-षणिः सहुरिः सहोवानस्मास्वोजः पृतनासु धेहि ॥ 4 ॥

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर्जिहीलाहं स्वातनूर्बलदेयाय मेहि ॥ 5 ॥

अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधायः ।
मन्यो वज्रिन्नभि मामा ववृत्स्वहनाव दस्यून् ऋत बोध्यापेः ॥ 6 ॥

अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जङ्घनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥ 7 ॥

त्वया मन्यो सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना अभि प्रयन्तु नरो अग्निरूपाः ॥ 8 ॥

अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून् वि भजस्व वेद ओजो मिमानो विमृधो नुदस्व ॥ 9 ॥

सहस्व मन्यो अभिमातिमस्मे रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम् ॥ 10 ॥

एको बहूनामसि मन्यवीलितो विशंविशं युधये सं शिशाधि ।
अकृत्तरुक् त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे ॥ 11 ॥

विजेषकृदिन्द्र इवानवब्रवो(ओ)3ऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मातमुत्सं यत आबभूथ ॥ 12 ॥

आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सहमेद्येधि महाधनस्य पुरुहूत संसृजि ॥ 13 ॥

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः पराजितासो अप निलयन्ताम् ॥ 14 ॥

धन्वनागाधन्व नाजिञ्जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्व नासर्वाः प्रदिशो जयेम ॥

भ॒द्रं नो॒ अपि॑ वातय॒ मनः॑ ॥

ॐ शान्ता॑ पृथिवी शि॑वम॒न्तरि॑क्षं॒ द्यौर्नो॑ दे॒व्यभ॑यन्नो अस्तु ।
शि॒वा॒ दिशः॑ प्र॒दिश॑ उ॒द्दिशो॑ न॒आपो॑ वि॒श्वतः॒ परि॑पान्तु स॒र्वतः॒ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

Web Url: http://www.vignanam.org/veda/manyu-suktam-devanagari.html